## APPENDIX 7

## CLASSICAL AYURVEDIC REFERENCE

### अजगन्धा

अजगन्धा ..... वशेमानि शूलप्रशमनानि भवन्ति।
(च० सू०; 4/45)

अजगन्धा खरपुष्पा वस्तगन्धा विगन्धिका ।
कारवी बर्बरा गन्धा तुङ्गी पूतिमयूरिका ।।
अजगन्धा वातहरा वीर्योष्णा तु ज्वरापहा ।
गुल्माष्ठीलाकफानाहशूलजिद्वह्निकृत्परा ।
(ध० नि०, शतपुष्पादि वर्ग; 97–98)

अजगन्धा कटूष्णा स्याद्वातगुल्मोदरापहा ।
कर्णव्रणार्तिशूलघ्नी पीताचेदञ्जने हिता ।।
(रा० नि०; शता० ह्वादि वर्ग; 178)

### अजमोदा

अजमोदा च शूलघ्नी तिक्तोष्णा कफवातजित् ।
हिक्काध्मानारुचीर्हन्ति कृमिजिद्वह्नि दीपनी ।।
(ध० नि०, शतपुष्पादि वर्ग; 96)

अजमोदा खराश्वा च मायूरो दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ।
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ।
नेत्रामयकृमिच्छर्दिहिक्कावस्तिरुजो हरेत् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 79)

अजमोदा कटुरुष्णा रुक्षा कफवातहारिणी रुचिकृत् ।
शूलाध्मानारोचकजठरामयनाशनी चैव ।।
(रा० नि०, पिप्पल्यादि वर्ग; 110)

### आमलकी (आर्द्रा)

विद्यादामलके सर्वान् रसान् लवणवर्जितान् ।
(च० सू०; 27/147)

अम्लं समधुरं तिक्तं कषायं कटुकं सरम् ।
चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकीफलम् ।
हन्ति वातं तदम्लत्वात्पित्तं माधूर्यशैत्यतः ।
कफं रुक्षकषायत्वात्फलेभ्योऽभ्यधिकं च तत् ।।
(सु० सू०; 46/143-144)

वयस्यामलकी वृष्या जातीफलरसं शिवम् ।
धात्रीफलं श्रीफलं च तथामृतफलं स्मृतम् ।
त्रिष्वामलकमाख्यातं धात्री तिष्यफलाऽमृता ।।
हरीतकी समं धात्रीफलम् किन्तु विशेषतः ।
रक्तपित्तप्रमेहघ्नं परं वृष्यं रसायनम् ।।
हन्ति वातं तदम्लत्वात्पित्तं माधुर्यं शैत्यतः ।
कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोषजित ।।
यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण मज्जानमपि निर्दिशेत् ।।
(भा० प्र०; हरीतक्यादि वर्ग; 38–41)

आमलकं कषायाम्लं मधुरं शिशिरं लघु ।
दाहपित्तवमीमेहशोफघ्नं च रसायनम् ।।
(रा० नि०; 327)

### आमलकी (शुष्क)

विद्यादामलके सर्वान् रसान् लवणवर्जितान् ।
(च० सू०; 27/147)

अम्लं समधुरं तिक्तं कषायं कटुकं सरम् ।
चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकी फलम् ।
हन्ति वातं तदम्लत्वात्पित्तं माधूर्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलेभ्योऽभ्यधिकं च तत् ।।
(सु० सू०; 46/143–144)

हरीतकीसमं धात्रीफलं किन्तु विशेषतः ।
रक्तपित्तप्रमेहघ्नं पर वृष्यं रसायनम् ।।
हन्ति वातं तदम्लत्वात्पित्तं माधुर्यशैत्यतः ।
कफं रूक्षकषायत्वात्फलं धात्र्यास्त्रिदोषजित् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 39–40)

### आरग्वध

चतुरंगुलो मृदुविरेचनानाम् श्रेष्ठः ।
(च० सू०; 25/40)

आरग्वधो राजवृक्षः शंपाकश्चतुरंगुलः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ।।

कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ।
आरग्वधो गुरुः स्वादुः शीतलः स्रंसनोत्तमः ।।
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलनुत् ।
तत्फलं स्त्रंसनं रुच्यं कुष्ठपित्तकफापहम् ।।
ज्वरे तु सततं पथ्यं कोष्ठशुद्धिकरं परम् ।
(भा० प्र०, हरीतक्यादिवर्ग; 148–160)

## अर्क (मूल एवं पत्र)

अर्कः सर्याह्वयः पुष्पी विक्षीरोऽथ विकीरणः ।
जम्भलः क्षीरपर्णी स्यादास्फोटोभास्कररोरविः ।।
अर्कस्तु कटुरुष्णश्च वातहृद्दीपनः सरः ।
शोफव्रणहरः कण्डूकुष्ठप्लीहकृमीञ्जयेत् ।।
(ध० नि०, करवीरादिवर्ग; 13–14)

अर्कःक्षीरदलः पुष्पी प्रतापः क्षीरकाण्डकः ।
विक्षीरो भास्करः क्षीरी खर्जूघ्नः शिवपुष्पकः ।।
भञ्जन क्षीरपर्णी स्यात् सविता च विकीरणः ।
सूर्य्याह्वश्च सदापुष्पो रविरास्फोटकस्तथा ।
तूलफलः शुकफलो विंशतिश्च समाह्वयः ।।
अर्कस्तु कटुरुष्णश्च वातजिद्दीपनीयक : ।
शोफव्रणहरः कण्डू-कुष्ठक्रिमिविनाशनः ।
(रा० नि०, करवीरादिवर्ग; 26–28)

## असन

यथा सर्वाणि कुष्ठानि हितः खदिर बीजकौ ।
(सु० चि० अ०; 6)

बीजकः सकषायश्च कफपित्तास्रनाशनः ।
(ध० नि०, आम्रादिवर्ग; 115 )

बीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन् ।
हन्ति श्लेष्मास्रपित्तञ्च त्वच्यः केश्यो रसायनः ।।
(भा० प्र०, वटादिवर्ग; 21)

## अशोक

अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः ।
दोषापचीतृषादाहकृमिशोषविषास्रजित् ।।
(भा० प्र०, पुष्पवर्ग; 48)

## अश्वगंधा

गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ।।
अश्वगन्धाऽनिलश्लेष्मश्वित्रशोथ क्षयापहा ।
बल्या रसायनी तिक्ता कषायोष्णाऽतिशुक्रला ।।
(भा० प्र०, गुडूच्यादिवर्ग; 189–190)

## अश्वत्थ

बोधिवृक्षकषायं तु प्रपिबेन्मधुना सह ।
वातरक्तं जयत्याशु त्रिदोषमपि दारुणम् ।
(च० चि०; 29/158)

बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गजाशनः ।
पिप्पलोदुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ।
गुरुस्तुवरको रुक्षो वर्ण्यो योनिविशोधनः ।।
(भा० प्र०, वटादिवर्ग; 3)

पिप्पलः सुमधुरस्तु कषायः शीतलश्च कफपित्त-
विनाशी ।
रक्तदाहशमनः स हि सद्यो योनिदोषहरणः
किल पक्व ।।
(रा० नि०, आम्रादिवर्ग; 114)

## अतसी

अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा ।।
अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरु : ।
उष्णा दृक्छुक्रवातघ्नी कफपित्तविनाशिनी ।।
(भा० प्र०, धान्यवर्ग; 66–67)

## अतिबला

बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ।।
(भा० प्र० गुडूच्यादिवर्ग; 144)

## अतिविषा

अतिविषा दीपनीयपाचनीय सांग्राहिक सर्वदोष-
हराणाम् ।
(च० सू०; 25/40)

अतिविषा शुक्लकंदा ज्ञेया विश्वा च भङ्गुरा ।
श्यामकंदा प्रतिविषाशृङ्गी चोपविषा विषा ।।
आर्द्रा श्वेता विरुपा च विषदा पित्तवल्लभा ।
घुणप्रियाऽतिसारघ्नी बालानां रोगनाशिनी ।।
कटूष्णाऽतिविषा तिक्ता कफपित्तज्वरापहा ।
आमातीसारकासघ्नी विषच्छर्दिविनाशिनी ।।
(ध० नि०; गुडूच्यादिवर्ग; 9–11)

विषात्वतिविषा विश्वा श्रृङ्गी प्रतिविषाऽरुणा ।
शुक्लकन्दा चोपविषाभङ्गुरा घुणवल्लभा ।।
विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् ।
कफपित्तातिसारामविषकासवमिक्रिमीन् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 213–214)

## बब्बूल

बब्बूलः कफनुद् ग्राही कुष्ठक्रिमिविषापहः ।
(भा० प्र०, वटादिवर्ग; 37)

आमरक्तातिसारघ्नः पित्तदाहार्त्तिनाशनः ।।
बब्बूलस्य फलं रुक्षं विशदं स्तम्भनं गुरु ।
(कै० दे० नि०, ओषधिवर्ग; 1087½ )

## बाकुची

अवल्गुजो बाकुची स्यात्सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ।।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्तिता ।
बाकुची मधुरा तिक्ता कटुपाका रसायनी ।।
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वर कृमिप्रणुत् ।।
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुनुत् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 206–209)

बाकुची सोमराजी च सोमवल्ली सुवल्लिका ।
सिता सितावरी चन्द्र-लेखा चान्द्री च सुप्रभा ।।
कुष्ठहन्त्री च काम्बोजी प्रतिगन्धा च वल्गुजा ।
स्मृता चन्द्राभिधा राजी काल्माषी च तथैन्दवी ।।
कुष्ठदोषापहा चैव कान्तिदाऽवल्गुजा तथा ।
चन्द्राभिधा प्रभायुक्ता विंशतिः स्यात्तु नामतः ।।
बाकुची कटुतिक्तोष्णा क्रिमिकुष्ठकफापहा ।
त्वग्दोषविषकण्डूति-खर्जुप्रशमनी च सा ।।
(रा० नि०, शताह्वादिवर्ग; 62–65)

## बिभीतक

भेदनं लघु रूक्षोष्णं वैस्वर्यकृमिनाशनम् ।
चक्षुष्यं स्वादु पाक्याक्षं कषायं कफपित्तजित् ।।
(सु० सू०; 46/200)

बिभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलस्तु सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः ।।
बिभीतकं स्वादुपाकं कषायं कफपित्तनुत् ।
उष्णवीर्यं हिमस्पर्शं भेदनं कासनाशनम् ।।
रुक्षं नेत्रहितं केश्यं कृमिवैस्वर्यनाशनम् ।
(भा० प्र०, हरीतक्यादिवर्ग; 36)

## बिल्व (फल)

बिल्वं सांग्राहिकदीपनीयवातकफप्रशमनानाम् ।।
(च० सू०; 25/40)

कफानिलहरं तीक्ष्णं स्निग्धं संग्राहिदीपनम् ।
कटुतिक्तकषायोष्णं बालं बिल्वमुदाहृतम् ।।
(सु० सू०; 46/174)

बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
श्रीफलस्तुवरस्तिक्तो ग्राही रुक्षोऽग्निपित्तकृत् ।
वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ।।
(भा० प्र०, गुडूच्यादिवर्ग; 13)

## चन्द्रशूर

चन्द्रिका चर्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ।।
चन्द्रशूरं हितं हिक्कावातश्लेष्मातिसारिणाम् ।
असृग्वातगदद्वेषि बलपुष्टिविवर्द्धनम् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 96–97)

## चित्रक

चित्रकमूलं दीपनीय पाचनीय गुदशोथार्शः शूलहराणाम् ।
(च० सू०; 25/40)

चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निकः ।
ज्योतिष्को वल्लरी वह्नि पाली पाठी कटुः शिखी ।।
कृष्णारुणोऽनलो द्वीपी चित्रभानुश्च पावकः ।
चित्रकोऽग्निसमः पाके कटुकः कफशोफजित् ।
वातोदरार्शो ग्रहणीक्षयपाण्डुविनाशनः ।।
(ध० नि०, शतपुष्पादिवर्ग; 80–81)

चित्रकोऽनलनामा च पाठी व्यालस्तथोषणः ।
चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ।।
रूक्षोष्णो ग्रहणीकुष्ठशोथार्शः कृमिकासनुत् ।
वातश्लेष्महरो ग्राही वातार्शः श्लेष्मपित्तहृत् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 70-71)

## धान्यक

धान्यकं धानकं धान्यं धाना धानेयकं तथा ।
कुनटी धेनुका छत्रा कुस्तुम्बुरु वितुन्नकम् ।।
धान्यकं तुवरं स्निग्धमवृष्यं मूत्रलं लघु ।
तिक्तं कटूष्णवीर्यञ्च दीपनं पाचनं स्मृतम् ।।
ज्वरघ्नं रोचकं ग्राहि स्वादुपाकि त्रिदोषनुत् ।
तृष्णादाहवमिश्वासकासकार्श्यक्रिमिप्रणुत् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 86–88)

## धातकी

धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ।।
धातकी कटुका शीता मदकृत्तुवरा लघुः ।
तृष्णाऽतीसारपित्तास्रविषक्रिमिविसर्पजित् ।।

(भा० प्र०, हरीतक्यादिवर्ग; 186–187)

## एरण्ड

एरण्डमूलं वृष्यवातहराणाम् ।

(च० सू०; 25/40)

शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डो व्यडम्बकः ।।
वातारिस्तरुणश्चापि रुबूकश्च निगद्यते ।
रक्तोऽपरो रुबूकः स्यादुरुबूको रुबुस्तथा ।।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ।
एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोथकटीबस्तिशिरः पीडोदरज्वरान् ।
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ।।

(भा० प्र०, गुडूच्यादिवर्ग; 60–63)

## गम्भारी

काश्मरी कटुका तिक्ता गुरूष्णा कफशोफनुत् ।
त्रिदोषविषदाहार्त्ति-ज्वरतृष्णास्रदोषजित् ।।

(रा० निं०, प्रभद्रादिवर्ग; 38)

## गोक्षुर (मूल, फल)

गोक्षुरको मूत्रकृच्छ्रानिलहराणाम् ।

(च० सू०; 25/40)

गोक्षुर :क्षुरकोऽपि स्यात्रिकण्टः स्वादुकण्टकः ।
गोकण्टको गोक्षुरको वनशृंगाट इत्यपि ।।
पलङ्कषाश्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका ।
गोक्षुरः शीतलः स्वादुर्बलकृद्वस्तिशोधनः ।।
मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः ।
प्रमेहश्वासकासार्शःकृच्छहृद्रोगवातनुत् ।।

(भा० प्र०, गुडूच्यादिवर्ग; 44–46)

## गुडूची

अमृता सांग्राहिक-वातहर-दीपनीय-श्लेष्मशोणित विबन्धप्रशमनानाम् ।

(च० सू०; 25–40)

गुडूची कटुका तिक्ता स्वादुपाका रसायनी ।।
संग्राहिणी कषायोष्णा लघ्वीबल्याऽग्निदीपिनी ।
दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम् ।।
कामलाकुष्ठवातास्रज्वर क्रिमिवमीन्हरेत् ।
प्रमेहश्वासकासार्शः कृच्छ्रहृद्रोगवातनुत् ।।

(भा० प्र०, गुडूच्यादिवर्ग; 8–10)

## गुग्गुलु

मेदोऽनिले गुग्गुलुः ।

(अ० हृ०, उ० स्था०; 40/48)

गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ।
कुम्भोलूखलकं क्लीबे महिषाक्षः पलङ्कषः ।।
गुग्गुलुर्विशदस्तिक्तो वीर्योष्णः पित्तलः सरः ।
कषायः कटुकः पाके कटू रूक्षो लघुः परः ।।
भग्नसंधानकृद् वृष्यः सूक्ष्मः स्वर्यो रसायनः ।

(भा० प्र०, कर्पूरादिवर्ग; 32, 38½)

## गुञ्जा (मूल, बीज)

गुञ्जाद्वयन्तु केश्यं स्याद्वातपित्तज्वरापहम् ।
कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलाऽपि ।।

(भा० प्र०, गुडूच्यादिवर्ग; 126–128)

गुञ्जाऽनुष्णा रसे तिक्ता कषाया कफपित्तहा ।
चक्षुष्या शुक्ला केश्या त्वच्या रुच्या बलप्रदा ।।
इन्द्रलुप्तहरा तीव्रा सविषा मदमोहकृत् ।
हन्ति रक्षोग्रहविषं कण्डूकुष्ठव्रणक्रिमीन् ।।

(कैं० दे० निं०, ओषधिवर्ग; 785–796)

## हरिद्रा

हरिद्रा स्वरसे तिक्ता रूक्षोष्णा विषमेहनुत् ।
कण्डूकुष्ठव्रणान्हन्ति देहवर्णविधायनी ।।
विशोधनी कृमिहरा पीनसारुचिनाशिनी ।

(ध० निं०, गुडूच्यादिवर्ग; 55½)

हरिद्रा काञ्चनी पीता निशाऽऽख्या वरवर्णिनी ।
कृमिघ्नी हल्दी योषित्प्रिया हट्टविलासिनी ।।
हरिद्रा कटुका तिक्ता रुक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ।।

(भा० प्र०, हरीतक्यादिवर्ग; 96–197)

## हरीतकी

हरीतकी पञ्चरसामुष्णामलवणां शिवाम् ।
दोषानुलोमनीं लघ्वीं विद्याद्दीपनपाचनीम् ।।

आयुष्यां पौष्टिकीं धन्यां वयसः स्थापनीं पराम् ।
वैर ोगप्रशम नीं बुद्धीन्द्रियबलप्रदाम् ।।
कुष्ठं गुल्ममुदावर्त. शोषं पाण्ड्वामयं मदम् ।
अर्शांसि ग्रहणीदोष पुराणं विषमज्वरम् ।।
हृद्रोगं सशिरोरोगमतीसारमरोचकम् ।
कासं प्रमेहमानाहं प्लीहानमुदरं नवम् ।।
कफप्रसेकं वैस्वर्यं वैवर्ण्यं कामलां क्रिमीन् ।
श्वयथुं तमकं छर्दि क्लैब्यमङ्गावसादनम् ।।
स्रोतोविबन्धान् विविधान् प्रलेपं हृदयोरसोः ।
स्मृतिबुद्धि प्रमोहं च जयेच्छीघ्रं हरीतकी ।।
(च० चि०; 29–34)

हरीतक्यभया पथ्या कायस्था पूतनाऽमृता ।
हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा ।।
वयस्था विजया चापि जीवन्ती रोहिणीति च ।।
(भा. प्र०, हरीतक्यादिवर्ग; 6–7)

## हिंगु

हिंगुनिर्यासश्छेदनीयदीपनीयानुलोमिकवातकफप्रशमनानाम् ।
(च० सू०; 25/40)

सहस्रवेधि जतुकं बाह्लीकं हिङ्गुरामठम् ।
हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासनुत् ।।
शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनम् ।
(भा० प्र०, हरीतक्यादिवर्ग; 100–101)

## जटामांसी

मांसी कृष्णजटा हिंस्रा नलदा जटिला मिशी ।
जटा च पिशिता पेशी क्रव्यादी च तपस्विनी ।।
मांसी स्वादुकषाया स्यात्कफपित्तास्रनाशिनी ।
विषमारुतहृद्बल्या त्वच्या कान्तिप्रसादनी ।।
(ध० नि०, चन्दनादिवर्ग; 43–44)

जटामांसी भूतजटा जटिला च तपस्विनी ।
मांसी तिक्ता कषाया च मेध्या कान्तिबलप्रदा ।
स्वाद्वी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठनुत् ।।
(भा प्र०, कर्पूरादिवर्ग; 89)

## जातीफल

जातीफलं जातिसस्यं शालूकं मालतीफलम् ।
मदशौण्डं जातिश्रृङ्गं पुटं सौमनसं फलम् ।।
जातीफलं कषायोष्णं कटु कण्ठामयार्तिजित् ।
वातातिसारमेहघ्नं लघु वृष्यं च दीपनम् ।।
(ध० नि०, चन्दनादिवर्ग; 33–34)

जातीफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु ।।
कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ।।
निहन्ति मुखवैरस्यं मलदौर्गन्ध्यकृष्णताः ।
कृमिकासवमिश्वासशोषपीनसहृद्रुजः ।।
(भा० प्र०, कर्पूरादिवर्ग; 54–55)

## कम्पिल्ल

कम्पिल्लकोऽथ रक्ताङ्गो रेची रेचनकस्तथा ।
रञ्जनो लोहिताङ्गश्च कम्पिल्लो रक्तचूर्णकः ।।
कम्पिल्लको वरेची स्यात् कटूष्णो व्रणनाशनः ।
गुल्मोदरविबन्धाध्मश्लेष्मक्रिमिविनाशनः ।।
(ध० नि०, चन्दनादिवर्ग; 124–125)

काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि च ।।
काम्पिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् ।
हन्ति रेची कटूष्णश्च मेहानाहविषाश्मनुत् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 146–147)

## काञ्चनार

काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः ।
काञ्चनारो हिमो ग्राही तुवरःश्लेष्मपित्तनुत् ।।
कृमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः ।
(भा० प्र०, गुडूच्यादिवर्ग; 101, 103)

## कंकोल

कङ्कोलं कटुतिक्तोष्णं वक्त्रवैरस्यन ाशनम् ।
मुखजाड्यहरं रुच्यंवा तश्लेष्महरं परम् ।।
(ध० नि०, चन्दनादिवर्ग; 36)

कङ्कोलं कोलकं प्रोक्तं तथा कोषफलं स्मृतम् ।
कङ्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम् ।।
आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्ध्यहृत् ।
(भा० प्र०, कर्पूरादिवर्ग; 116)

## कण्टकारी

.... कण्टकारिका इति दशेमानि कण्ठ्यानि भवन्ति ।
(च० सू०; 4/9)

कण्टकारिका इति दशेमानि कासहराणि भवन्ति ।
(च० सू०; 4/36)

कण्टकारिका इति दशेमानि श्वयथुहराणि भवन्ति ।
(च० सू०; 4/ 38

कण्टकार्य इति दशेमानि शीतप्रशमनानि भवन्ति ।
(च० सू०; 4/42)

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी दुष्प्रधर्षिणी ।।
कण्टकारी कटुस्तिक्ता तथोष्णा श्वासकासजित् ।
अरुचिज्वरवातामदोषहृद्गदनाशिनी ।।
(ध० नि०, गुडूच्यादिवर्ग; 95–96)

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका ।
कण्टालिका कण्टकिनी धावनी बृहती तथा ।।38।।
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ।
रुक्षोष्णा पाचनी कासश्वासज्वर कफानिलान् ।।
निहन्ति पीनसं पार्श्वपीडाकृमिहृद्दामयान् ।।41।।
(भा० प्र०, गुडूच्यादिवर्ग; 38–41)

कण्टकारी कण्टकिनी दुःस्पर्शा दुष्प्रधर्षिणी ।
क्षुद्रा व्याघ्री निदिग्धा च धावनी क्षुद्रकण्टिका ।।
बहुकण्टा क्षुद्रकण्टा ज्ञेया क्षुद्रफला च सा ।
कण्टकारिका चित्रफला स्याच्चतुर्दशसंज्ञका ।।
कण्टकारी कटूष्णा च दीपनी श्वासकासजित् ।
प्रतिश्यायार्त्ति दोषघ्नी कफवातज्वरार्त्तिनुत् ।।
(रा० नि०, शताह्वादिवर्ग; 30–32)

## कन्यासार

वीरास्रावः सहासारः कुमारीरससम्भवः ।
सहासारोऽग्निजननः पित्तनिर्हरणो मतः ।।
बलकृद्रेचनः पुष्पजननो गर्भपातनः ।
विट्सङ्गे कृमिरोगे च सन्यासेऽपस्मृतौतथा ।
लुप्ते रजसि नारीणां शीतपित्ते शिरोरुजि ।
ज्वरे श्लेष्मोद्भवे प्लोह्नि मन्देऽग्नौ च प्रयुज्यते ।।
(आयुर्वेदविज्ञान)

## करञ्ज

करञ्ज. . .फलं जन्तुप्रमेहनुत् ।
रुक्षोष्णंकटुकं पाके लघु वातकफापहम् ।।
(सु०, सू०; 46/197–198)

करञ्जः कटुकस्तीक्ष्णो वीर्योष्णो योनिदोषहृत् ।
कुष्ठोदावर्त्तगुल्मार्शोव्रणक्रिमिकफापहा ।।
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ।
भेदनं कटुकं पाके वीर्योष्णं पित्तलं लघु ।।
तत्फलं कफवातघ्नं मेहार्श कृमिकुष्ठजित् ।
(भा० प्र०, गुडूच्यादिवर्ग; 120–121½)

## करवीर

करवीरं कटुस्तिक्तो वीर्ये चोष्णो ज्वरापहः ।
चक्षुष्यः कुष्ठकण्डूघ्नः प्रलेपाद्विषमन्यथा ।।
(ध० नि०; करवीरादिवर्ग; 3)

करवीरद्वयं तिक्तं कषायं कटुकञ्च तत् ।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ।।
वीर्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ।।
(भा० प्र०, गुडूच्यादिवर्ग; 83–84)

## कर्कटश्रृङ्गी

. . . . .श्रृङ्गी कासहराणि भवन्ति ।
(च० सू०; 4/36)

कुलीरश्रृङ्ग्य इति दशेमानि हिक्कानिग्रहणानि भवन्ति ।।
(च० सू०; 4/30)

श्रृङ्गी कर्कटश्रृङ्गी च स्यात्कुलीर विषाणिका
अजश्रृङ्गी च चक्रा च कर्कटाख्या च कीर्तिता ।।
श्रृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् ।
श्वासोर्ध्ववाततृट्कासहिक्काऽरुचिर्वमीन्हरेत् ।।
(भा० प्र०, हरीतक्यादिवर्ग; 178–179)

## कार्पास (बीज)

तद्बीजं श्लेष्मलं वृष्यं स्निग्धं स्तन्यविवर्धनम् ।।
(कै० दे० नि०, ओषधिवर्ग; 1098)

कार्पासी तुण्डकेशी च समुद्रान्ता च कथ्यते ।
कार्पासकी लघुः कोष्णा मधुरा वातनाशिनी ।।
तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् ।
तत्कर्णपिडकानादपूयास्रावविनाशनम् ।।
तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु ।।
(भा० प्र०, गुडूच्यादिवर्ग; 151–152)

कार्पासी मधुरा शीता स्तन्या पित्तकफापहा ।
तृष्णादाहश्रमभ्रान्ति मूर्च्छाहृद्बलकारिणी ।।
(रा० नि०, शताह्वादिवर्ग; 189)

## कशेरु

कशेरुकद्वयं शीतं मधुरं तुवरं गुरु ।
पित्तशोणित दाहघ्नं नयनामयनाशनम् ।।
ग्राहि शुक्रानिल श्लेष्मारुचिस्तन्यकरं स्मृतम् ।।
(भा० प्र०, शाकवर्ग; 113)

### केतकी

केतकः कटुकः स्वादुर्लघुस्तिक्तकफापहः ।
उष्णा तिक्तरसा ज्ञेया चक्षुष्या हेमकेतकी ।।
(भा० प्र०, पुष्पादि वर्ग; 43)

### खदिर

खदिरः कुष्ठघ्नानाम् ।
(च० सू०; 25/40.)

खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ।।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् ।।
(भा० प्र०, वटादि वर्ग; 31–32)

### किराततिक्त

किराततिक्तः कैरातः कटुतिक्तः किरातकः ।।
काण्डतिक्तोऽनार्यतिक्तो भूनिम्बो रामसेनकः ।
किरातकोऽन्यो नैपालः सोऽर्द्धतिक्तो ज्वरान्तकः ।।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 153–155)

### कृष्णजीरक

तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्धनम् ।
कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम् ।।
(सुश्रुत सू०; 46/229)

जरणा कटुरुष्णा च कफशोफनिकृन्तनी ।
रुच्याऽजीर्णज्वरघ्नी च चक्षुष्या ग्राहिणी परा ।।
(ध० नि०, शतपुष्पादि वर्ग; 71)

### कुलत्थ

उष्णतः कुलत्थः रसतः कषायः कटुर्विपाके कफमारुतघ्नः ।
शुक्राश्मरीगुल्मनिषूदनश्च सांग्राहिकः पीनसकासहन्ता ।।
आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकृच्च ।
(सुश्रुत सू०; 46/37)

कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ।
लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान् ।।
हन्ति हिक्काऽश्मरीशुक्रदाहानाहान् सपीनसान् ।
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः सरः ।।
(भा० प्र०, धान्यवर्ग; 60–62)

### कुष्ठ

कुष्ठं वातहराभ्यङ्गोपनाहोपयोगिनाम् ।
(च० सू०; 25/40)

कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमारुत्कफान् ।
(भा० प्र०, हरीतक्यादि वर्ग; 173)

कुष्ठं रुजाऽगदो व्याधिरामयं पारिभद्रकम् ।
रामं वानीरजं वाप्यं ज्ञेयं त्वग्दोषमुत्पलम् ।।
कुष्ठं कटूष्णं तिक्तं स्यात् कफमारुतकुष्ठजित् ।
विसर्पविषकण्डूति-खर्जूदद्रुघ्नकान्तिकृत् ।।
(रा० नि०, चन्दनादिवर्ग; 115–116)

### कुटज

कुटजत्वक् श्लेष्मपित्तरक्तसांग्राहिकोपशोषणानाम् ।
(च० सू०; 25/40)

कुटजः कटुकस्तिक्तः कषायो रूक्षशीतलः ।
कुष्ठातीसारपित्तास्र गुदजानि विनाशयेत् ।।
(ध० नि०, शतपुष्पादि वर्ग; 14)

कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ।
अर्शोऽतिसार पित्तास्रकफतृष्णाऽऽमकुष्ठनुत् ।।
(भा० प्र०, गुडूच्यादिवर्ग; 118)

### लवङ्ग

लवङ्गं देवकुसुमं श्रीसज्ञं श्रीप्रसूनकम् ।
लवङ्गं कटुकं तिक्तं लघुनेत्रहितं हिमम् ।।
दीपनं पाचनं रुच्यं कफपित्तास्रनाशकृत् ।
तृष्णां छर्दि तथाऽऽध्मानं शूलमाशुविनाशयेत् ।
कासंश्वासञ्च हिक्काञ्च क्षयं क्षपयति ध्रुवम् ।।
(भा० प्र०, कर्पूरादि वर्ग; 58–59)

### लोध्र

लोध्रो ग्राही लघुः शीतः चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 216)

### मदन

मदनफलं वमनास्थापनानुवासनोपयोगिनाम् ।
(च० सू०; 25/40)

मदनो मधुरस्तिक्तो वीर्योष्णो लेखनो लघुः ।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ।।
रूक्षः कुष्ठकफानाह शोथगुल्मव्रणापहः ।।
(भा० प्र०, हरीतक्यादि वर्ग; 160–161)

## मिश्रेया

तिक्ता स्वादुर्हिमा वृष्या दुर्नामक्षयजिन्मिशिः ।
क्षतक्षीणहिता बल्या वातपित्तास्रदोषजित् ।।
(ध० नि०, शतपुष्पादि वर्ग; 5)

## न्यग्रोध

वट : शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्न : कषायो योनिदोषहृत् ।।
(भा० प्र०, वटादि वर्ग; 2)

वटः कषायो मधुर : शिशिर : कफपित्तजित् ।
ज्वरदाह तृषामोहव्रणशोफापहारक ः।।
(रा० नि०, आम्रादि वर्ग; 118)

## पाषाणभेद

पाषाणभेद मूत्र विरेचनीयानि भवन्ति ।।
(च० सू०; 4/35)

अश्मभेदो हिमस्तिक्तः कषायो बस्तिशोधनः ।।
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ।
योनिरोगान्प्रमेहांश्च प्लीहशूलव्रणानि च ।।
(भा० प्र०, हरीतक्यादि वर्ग; 184–185)

## पाठा

....पाठा स्तन्यशोधनानि भवन्ति ।
(च० सू०; 4/18)

पाठा तिक्तरसा वृष्या विषघ्नी कुष्ठकण्डुनुत् ।।
छर्दिहृद्रोगज्वरजित् त्रिदोषशमनी परा ।
पाठाऽतिसारशूलघ्नी कफपित्तज्वरापहा ।।
(ध० नि०, गुडूच्यादि वर्ग; 70–71)

पाठोष्णा कटुका तीक्ष्णा वातश्लेष्महरी लघु : ।
(भा० प्र०, गुडूच्यादि वर्ग० 192½)

भग्नसन्धानकृत्पित्त-दाहातीसारशूलहृत् ।।
(रा० नि०, पिप्पल्यादि वर्ग; 121)

## पूग

भेदि सम्मोहकृत्पूगं कषायं स्वादु रोचनम् ।
कफपित्तहरं रूक्षं वक्त्रक्लेदमलापहम् ।।
(ध० नि०, चन्दनादि वर्ग; 38)

पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ।।
(भा० प्र०, आम्रादि वर्ग; 50)

## पुनर्नवा (रक्त)

उष्णानि स्वादुतिक्तानि वातप्रशमनानि च ।
तेषु पौनर्नवं शाकं विशेषाच्छोफनाशनम् ।।
(सुश्रुत सू०; 46/255)

पुनर्नवाऽन्या रक्ताख्या क्रूरा मण्डलपत्रिका ।
रक्तकाण्डा वर्षकेतुर्लोहिता रक्तपत्रिका ।।
वैशाखी रक्तवर्षाभूः शोफघ्नी रक्तपुष्पिका ।
विकस्वरा विषघ्नी च प्रावृषेण्या च सारि ी ।।
वर्षाभवः शोणपत्रः शोणः सम्मीलितद्रुमः ।
पुनर्नवो नवो नव्यः स्याद्द्वाविंशतिसंज्ञया ।।
रक्ता पुनर्नवा तिक्ता सारिणी शोफनाशिनी ।
रक्तप्रदरदोषघ्नी पाण्डुपित्तप्रमर्दिनी ।।
(रा० नि०, पर्पटादि वर्ग; 117–120)

## सप्तपर्ण

सप्तपर्णः शुक्तिपर्णश्छत्रपर्णः सुपर्णकः ।
सप्तच्छदो गूढपुष्पस्तथा शाल्मलिपत्रकः ।।
त्रिदोषशमनो हृद्यः सुरभिर्दीपनः सरः ।
शूलगुल्मकृमीन् कुष्ठं हन्ति शाल्मलिपत्रकः ।।
(ध० नि०, चन्दनादि वर्ग; 79–80)

सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजन्तुजित् ।
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः सरः ।।
(भा० प्र०, वटादि वर्ग; 75)

## शटी

भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकाऽनुष्णा ऽऽस्यमलनाशिनी ।
शोथकासव्रणश्वासशूलसिध्मग्रहापहा ।।
(भा० प्र०, कर्पूरादि वर्ग; 100)

## स्नुही

स्नुक्पयस्तीक्ष्णविरेचनानाम् ।
(चरक सू०; 25/40)

सेहुण्डो रेचनस्तीक्ष्णो दीपनः कटुको गुरुः ।
शूलामाष्ठीलिकाध्मानकफगुल्मोदरानिलान् ।।
उन्मादमेहकुष्ठार्शःशोथमेदोऽश्मपाण्डुताः ।
व्रणशोथज्वरप्लीहविषदूषीविषं हरेत् ।।
उष्णवीर्यं स्नुहीक्षीरं स्निग्धञ्च कटुकं लघु ।
गुल्मिनां कुष्ठिनाञ्चापि तथैवोदररोगिणाम् ।।
हितमेतद्विरेकार्थे ये चान्ये दीर्घरोगिणः ।
(भा० प्र०, गुडूच्यादि वर्ग; 73–76)

## सूक्ष्मैला

.....एला...श्वासहराणि भवन्ति ।।
(च० सू०; 4/37)

सूक्ष्मैला मूत्रकृच्छ्घ्नी श्वासकासक्षये हिता ।
सूक्ष्मैला शीतला स्वादुहृद्या रोचनदीपनी ।।
(ध० नि०, शतपुष्पादि वर्ग; 45)

एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ।
रसे तु कटुका शीता लघ्वी वातहरी मता ।।
(भा० प्र०, कर्पूरादि वर्ग; 63)

## शुण्ठी

स्निग्धोष्णा कटुका शुण्ठी वृष्या शोफकफारुचीन् ।
हन्ति वातोदरश्वासपाण्डुश्लीपदनाशिनी ।।
(ध० नि०, शतपुष्पादि वर्ग; 83)

शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः ।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 45)

## स्वर्णपत्री

स्वर्णपत्री तु तिक्तोष्णा भवेत् सुखविरेचनी ।
स्वर्णपत्री कटुस्तिक्ता कषाया च रसे लघुः ।
तीक्ष्णोष्णा रेचनी कोष्ठशुद्धिकृन्मलबन्धनुत् ।।
(प्रि० नि०, शतपुष्पादि वर्ग; 62)

## श्वेतजीरक

तीक्ष्णोष्णं कटुकं पाके रुच्यं पित्ताग्निवर्धनम् ।
कटु श्लेष्मानिलहरं गन्धाढ्यं जीरकद्वयम् ।।
(सुश्रुत सू०; 46/229)

गौराजाजी हिमा रुच्या कटुर्मधुरदीपनी ।
कृमिघ्ना विषहन्त्री च चक्षुष्याऽऽध्माननाशिनी ।।
(ध० नि०, शतपुष्पादि वग; 69)

जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ।।
ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ।।
(भा० प्र०, हरीतक्यादि वर्ग; 84–85)

## श्वेत सारिवा

सारिवे द्वे तु मधुरे कफवातास्त्रनाशने ।
कुष्ठकण्डूज्वरहरे मेहदुर्गन्धिनाशने ।।
(ध० नि०, गुडूच्यादि वर्ग; 160)

सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ।
दोषत्रयास्त्रप्रदरज्वरातीसारनाशनम् ।।
(भा० प्र०, गुडूच्यादि वर्ग; 238)

## तगर

तगरं स्यात् कषायोष्णं स्निग्धं दोषत्रयप्रणुत् ।
दृक्शीर्षविषदोषघ्नं भूतापस्मारनाशनम् ।।
(ध० नि०, चन्दनादि वर्ग; 52)

तगरं मधुरं तिक्तं कटु पाके रसे लघु ।
स्निग्धोष्णं तुवरं भूतमदापस्मारनाशनम् ।।
विषचक्षुः शिरोरोगरक्तदोषत्रयापहम् ।।
(कै० दे० नि०, औषधि वर्ग; 1275–1276)

## तामलकी

भूधात्री वातकृत्तिका कषाया मधुरा हिमा ।
पिपासाकासपित्तास्त्रकफपाण्डु क्षतापहा ।।
(भा० प्र०, गुडूच्यादि वर्ग; 278)

तामलकी हिमा तिक्ता कषाया मधुरा लघुः ।
रोचनी पाण्डुपित्तास्त्रकफकुष्ठविषापहा ।
जयेच्छ्वासतृषादाहहिध्माकासक्षतक्षयान् ।
(कै० दे० नि०, औषधि वर्ग; 250)

भू धात्री तु कषायाम्लपित्तमेहविनाशिनी ।
शिशिरा मूत्ररोगार्त्तिशमनी दाहनाशिनी ।।
(रा० नि०, पर्पटादि वर्ग; 93)

## त्वक्

वराङ्गं लघु तीक्ष्णोष्णं कफवातविषापहम् ।
कण्ठवक्त्ररुजो हन्ति शिरोहृद्बस्तिशोधनम् ।।
(ध० नि०, शतपुष्पादि वर्ग; 51)

त्वक्स्वाद्वी तु तनुत्वक्स्यात्तथा दारुसितामता ।।
उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ।
सुरभिः शुक्ला बल्या मुखशोषतृषापहा ।।
(भा० प्र०, कर्पूरादि वर्ग; 66–67)

## त्वक्पत्र

पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु ।
निहन्ति कफवातार्शोहृल्लासारुचिपीनसान् ।।
(भा० प्र०, कर्पूरादि वर्ग; 68)

## उदुम्बर

.....उदुम्बर...मूत्रसंग्रहणीयानि भवन्ति।।

(चरक सू०; 4/33)

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत् ।।

(सुश्रुत सू०; 38/49)

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।।
मधुरतुवरो वर्ण्यो व्रणशोधनरोपणः ।।

(भा० प्र०, वटादि वर्ग; 8–9)

## उपकुञ्चिका

..कुञ्चिका...। रोचनं दीपनं वातकफदौर्गन्ध्य-
नाशनम् ।।

(चरक सू०; 27/307)

पृथ्वीका कटुका पाके रुच्या पित्ताग्निदीपनी ।
श्लेष्माध्मानहराऽजीर्णजन्तुघ्नी च प्रकीर्तिता ।।६०।।

(रा० नि०, शतपुष्पादि वर्ग; 60)

जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ।।
ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम् ।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत् ।।

(भा० प्र०, हरीतक्यादि वर्ग; 84–85)

पृथ्वीका कटुतिक्तोष्णा वातगुल्मामदोषनुत् ।
श्लेष्माध्मानहराजीर्णाजन्तुघ्नी दीपनी परा ।।

(रा० नि०, पिप्पल्यादि वर्ग; 64)

## वरुण

वरुणादिः कफं मेदो मन्दाग्नित्वं नियच्छति ।
आढ्यवातं शिरः शूलं गुल्मं चान्तः सविद्रधिम् ।।

(अ० हृ०, सूत्र; 15/22)

वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान् ।।
निहन्ति गुल्मवातास्रकृमींश्चोष्णोऽग्निदीपनः ।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः ।।

(भा० प्र०, वटादि वर्ग; 65–66)

## वासा

वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः ।
तिक्तस्तुवरको हृद्यो लघुःशीतस्तृर्डातिहृत् ।।
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः ।

(भा० प्र०, गुडूच्यादि वर्ग; 89–90)

## विडङ्ग

.... विडंगं कृमिघ्नानाम् ।

(च० सू०; 25/47)

रूक्षोष्णं कटुकं पाके लघु वातकफापहम् ।
ईषत्तिक्तं विषान् हन्ति विडङ्गं कृमिनाशनम् ।।

(ध० नि०, शतपुष्पादि वर्ग; 12)

पुंसि क्लीबे विडङ्गः स्यात्कृमिघ्नो जन्तुनाशनः ।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुलः ।।
विडङ्गं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु ।
शूलाध्मानोदरश्लेष्मकृमिवातविबन्धनुत् ।।

(भा० प्र०, हरीतक्यादि वर्ग; 111–112)

## विजया

विजया रञ्जिका भङ्गा तन्द्राकृद्बहुवादिनी ।
मादनी मादिका मातुः प्रोक्ता गञ्जाकिनिस्तथा ।।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्धिनी ।।

(ध० नि०, गुडूच्यादि वर्ग; 126–127)

## यष्टी

मधुकं चक्षुष्यवृष्यकेश्यकण्ठ्यवर्ण्यविरजनीय-
रोपणीयानाम् ।

(चरक सू०; 25/40)

मधुयष्टी च यष्टी च यष्टीमधु मधुस्रवा ।
यष्टीकं मधुकं चैव यष्ट्याह्वं मधुयष्टिका ।।
मधुयष्टी स्वादुरसा शीता पित्तविनाशिनी ।
वृष्या शोषक्षयहरा विषच्छर्दिविनाशिनी ।।

(ध० नि०, गुडूच्यादिवर्ग; 138–139)

यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्णकृत् ।
सुस्निग्धा शुक्रला केश्या स्वर्या पित्तानिलास्रजित् ।
व्रणशोथविषच्छर्दि तृष्णाग्लानिक्षयापहा ।।

(भा० प्र०, हरीतक्यादि वर्ग; 146)

## यवानी

यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः ।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत् ।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत् ।।

(भा० प्र०, हरीतक्यादि वर्ग; 76–77)

### KVĀTH

वह्नौ तु क्वथितं द्रव्यं श्रृतमाहुश्चिकित्सकाः ।

(Caraka samhitā, Sūtra Sthāna Adhyāya 4/8½.)

मृदौ चतुर्गुणं देयं मध्यमेऽष्टगुणं तथा ।
द्रव्ये तु कठिने देयं बुधैः षोडशिकं जलम् ।।

(Dravyaguṇa vijyāna, Paribhāsākhaṇḍa.)

### ŚODHANA

उद्दिष्टैरौषधैः सार्द्धं क्रियते पेषणादिकम् ।
मलविच्छित्तये यत्तु शोधनं तदिहोच्यते ।।

(Rasataraṅgiṇi, Taraṅga 2; 52.)

### DOLĀYANTRA

द्रवद्रव्येण भाण्डस्य पूरितार्धोदकस्य च ।
मुखस्योभयतो द्वारद्वयं कृत्वा प्रयत्नतः ।।
तयोस्तु निक्षिपेद्दण्डं तन्मध्ये रसपोटलीम् ।
बद्ध्वा तु स्वेदयेदेतद्दोलायन्त्रमिति स्मृतम् ।।

(Rasaratnasamuccaya, Adhyāya 9; 3-4.)

### BHĀVANĀ

यच्चूर्णितस्य धात्वादेर्द्रवैः सम्पेष्य शोषणम् ।
भावनं तन्मतं विज्ञैर्भावना च निगद्यते ।।

(Rasataraṅginī, Taraṅga 2; 49.)

दिवा दिवातपे शुष्कं रात्रौ रात्रौ निवासयेत् ।
श्लक्ष्णचूर्णी कृतं द्रव्यं सप्ताहं भावनाविधिः ।।

(Bhaiṣajya ratnāvalī, Paribhāṣāprakaraṇa; 50.)

### KĀÑJIKA

अन्नं शाल्यादिसंसिद्धं प्रक्षिप्तं त्रिगुणे जले ।
धान्याम्लं सन्धितं प्रोक्तमारनालं च काञ्जिकम् ।।
शालिकोद्रवमण्डैर्वा सन्धितं काञ्जिकं भवेत् ।।

(Paribhāṣā Prabandha.)

### CŪRṆODAKA

रवितद्वयोन्मितं चूर्णं पञ्चतोलकसंमिते ।
जले विनिक्षिपेत्प्राज्ञस्त्रियामं स्थापयेद् बुधः ।।
ततः सारकपत्रेण सारयेत्काचपात्रके ।
चूर्णोदकमिति ख्यातं तथैव च सुधोदकम् ।।

(Rasataraṅginī, Taraṅga 11. 216-217.)

### PUṬAPĀKA

पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ।।
पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता ।
लेपं च द्वयंगुलं स्थूलं कुर्याद्वांगुष्ठमात्रकम् ।।
काश्मरीवटजम्ब्वादि पत्रैर्वेष्टनमुत्तमम् ।
पलमात्रं रसो ग्राह्यः कर्षमात्रं मधुक्षिपेत् ।।
कल्कचूर्णद्रवाद्यास्तु देयाः स्वरसवद्बुधैः ।

(Śaraṅgadharasamhitā, Madhyamakhaṇḍa Adhyāya 1; 23-25.)

### CITRAKA ŚODHANA

रक्तचित्रक मूलं तु चूर्णतोये निमज्जयेत् ।
ततोनिदाघसंशुष्कं शुद्धिमायात्यनुत्तमाम् ।।

(Rasataraṅginī, Taraṅga 24; 575.)

### GUÑJĀ ŚODHANA

गुञ्जा काञ्जिकसंस्विन्ना शुद्धिमायाति यामतः ।

(Rasāmṛtam, Pariśiṣta 8; page 147.)

### HIṄGU ŚODHANA

रामठं समशुद्धाज्यसंयुतं दर्विकागतम् ।
विपक्वमग्नितापेन शुद्धिमायात्यनुत्तमाम् ।।

(Rasataraṅginī, Taraṅga 24; 578.)

### KAMPILLA ŚODHANA

साधारणरसाः सर्वे मातुलङ्गार्द्रकाम्बुना ।
त्रिवारं भाविता शुष्का भवेयुर्दोषवर्जिताः ।।

(Ayurveda prakāsha, Adhyaya 2; 346.)

### KARAVĪR ŚODHANA

दोलायन्त्रेण गोदुग्धे शोधयेत् करवीरकम् ।।

(Sāraṅgadhara samhitā, Madhyamakhaṇḍa, Adhyāya 12; 300.)

### SNUHĪ ŚODHANA

पलद्वयं सुधादुग्धं तोलकद्वयसंमिते ।
चिञ्चादलद्रवे वस्त्रपूते घर्मे विशोषयेत् ।।
द्रवं विशुष्कं विज्ञाय सुधा दुग्धं समाहरेत् ।
ततः सर्वत्र योगेषु प्रयुञ्जीतभिषग्वरैः ।।

(Rasataraṅgiṇi, Taraṅga 24; 517-518.)

### VIJAYĀ ŚODHANA

विजयां वस्त्रबद्धां तु जलैः प्रक्षालयेद्बुधः ।
हरिद्वर्ण जलं यावत्ततः शुष्कां प्रयोजयेत् ।।

(Rasāmṛta, Pariśiṣta 8; page 147.)